# ॥ મઙ્ગલાષ્ટકમ્ ॥

.. ma NgalAShTakam ..

sanskritdocuments.org

August 20, 2017

# .. ma NgalAShTakam ..

# ॥ મઙ્ગલાષ્ટકમ્ ॥

## Sanskrit Document Information

Text title : maNgalAShTakam

File name : maNgalAShTakam.itx

Category : aShTaka, deities_misc

Location : doc_deities_misc

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ મઙ્ગલાષ્ટકમ્ ॥

બ્રહ્માવિષ્ણુર્ગિરીશઃ સુરપતિરનલઃ પ્રેતરાડ્યાતુનાથ-
સ્તોયાધીશશ્ચ વાયુર્ધનદગુહગણેશાર્કચન્દ્રાશ્ચ રુદ્રાઃ ।
વિશ્વાદિત્યાશ્વિસધ્યા વસુપિતૃમરુતસ્સિદ્ધવિદ્યાશ્ચ યક્ષા
ગન્ધર્વાઃ કિન્નરાદ્યાખિલગગનચરા મઙ્ગલં મે દિશન્તુ ॥ ૧॥

વાણી લક્ષ્મી ધરિત્રી હિમગિરિતનયા ચણ્ડિકા ભદ્રકાલી
બ્રહ્માદ્યા માતૃસઙ્ઘા અદિતિદિતિસતીત્યાદયો દક્ષપુત્ર્યઃ ।
સાવિત્રી જહ્નુકન્યા દિનકરતનયારુન્ધતી દેવપત્ન્યઃ
પૌલોમાદ્યાસ્તથાન્યાઃ ખચરયુવતયો મઙ્ગલં મે દિશન્તુ ॥ ૨॥

મત્સ્યઃ કૂર્મો વરાહો નૃહરિરથ વટુર્ભાર્ગવો રામચન્દ્ર-
સ્સીરી કૃષ્ણશ્ચ ખડ્ગી સકપિલનરનારાયણાત્રેયવૈદ્યાઃ ।
અન્યે નાનાવતારાઃ નરકવિજયિનશ્ચક્રમુખ્યાયુધાનિ
તત્પત્ન્યસ્તત્સુતાશ્ચાપ્યખિલહરિકુલા મઙ્ગલં મે દિશન્તુ ॥ ૩॥

વિશ્વામિત્રો વસિષ્ઠઃ કલશભવ ઉતથ્યોઽઙ્ગિરાઃ કાશ્યપશ્ચ
વ્યાસઃ કણ્વો મરીચી ક્રતુભૃગુપુલહા શૌનકોઽત્રિઃ પુલસ્ત્યઃ ।
અન્યે સર્વે મુનીન્દ્રાઃ કુજબુધગુરુશુક્રાર્કજાદ્યા ગ્રહા યે
નક્ષત્રાણિ પ્રજેશાઃ ફણિગણમનવો મઙ્ગલં મે દિશન્તુ ॥ ૪॥

તાર્ક્ષ્યોઽનન્તો હનૂમાન્ બલિરપિ સનકાદ્યાઃ શુકો નારદશ્ચ
પ્રહ્લાદઃ પાણ્ડુપુત્રા નૃગનલનહુષાઃ વિષ્ણુરાતોઽમ્બરીષઃ ।
ભીષ્માક્રૂરોદ્ધવોશીનરભરતહરિશ્ચન્દ્રરુક્માઙ્ગદાદ્યાઃ
અન્યે સર્વે નરેન્દ્રા રવિશશિકુલજા મઙ્ગલં મે દિશન્તુ ॥ ૫॥

આકૂત્યાદ્યાશ્ચ તિસ્રઃ સકલમુનિકલત્રાણિ દારા મનૂનાં
તારા કુન્તી ચ પાઞ્ચાલ્યથ નલદયિતા રુક્મિણી સત્યભામા ।
દેવક્યાદ્યાશ્ચ સર્વા યદુકુલવનિતા રાજભાર્યાસ્તથાન્યાઃ
ગોપ્યશ્ચારિત્રયુક્તાઃ સકલયુવતયો મઙ્ગલં મે દિશન્તુ ॥ ૬॥

વિપ્રા ગાવશ્ચ વેદાઃ સ્મૃતિરપિ તુલસી સર્વતીર્થાનિ વિદ્યાઃ
નાનાશાસ્ત્રેતિહાસા અપિ સકલપુરાણાનિ વર્ણાશ્રમાશ્ચ ।
સાઙ્ખ્યં જ્ઞાનં ચ યોગાવપિ યમનિયમૌ સર્વકર્માણિ કાલાઃ

સર્વે ધર્માશ્ચ સત્યાદ્યવયવસહિતા મઙ્ગલં મે દિશન્તુ ॥ ૭॥

લોકા દ્વીપાઃ સમુદ્રાઃ ક્ષિતિધરપતયો મેરુકૈલાસમુખ્યાઃ
કાવેરીનર્મદાદ્યાઃ શુભજલસરિતઃ સ્વર્દ્રુમા દિગ્ગજેન્દ્રાઃ ।
મેઘા જ્યોતીંષિનાનાનરમૃગપક્ષ્યાદયઃ પ્રાણિનોઽન્યે
સર્વૌષધ્યશ્ચ વૃક્ષાઃ સકલતૃણલતા મઙ્ગલં મે દિશન્તુ ॥ ૮॥

ભક્ત્યા સંયુક્તચિત્તાઃ પ્રતિદિવસમિમાન્ મઙગલસ્તોત્રમુખ્યાન્
અષ્ટૌ શ્લોકાન્ પ્રભાતે દિવસપરિણતૌ યે ચ મર્ત્યાઃ પઠન્તિ ।
તે નિત્યં પૂર્ણકામા ઇહ ભુવિ સુખિનશ્ચાર્થવન્તોઽપિ ભૂત્વા
નિર્મુક્તા સર્વપાપૈર્વયસિ ચ ચરમે વિષ્ણુલોકં પ્રયાન્તિ ॥ ૯॥

ઇતિ મઙ્ગલાષ્ટકસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. ma NgalAShTakam ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*